सं० ४८४५

नाम - सप्तशती-चण्डीस्तोत्र व्याख्याने-चण्डी स्तोत्र प्रयोगविधिः

कर्त्ता - नागोजी भट्टः शिव भट्ट पुत्रः

पत्र सँख्या - १८ पत्राणि [१८ पत्राणि] सं० —

विषयः - तंत्रम्

चण्डीस्तोत्रविधिः सप्तशत्याख्यस्तोत्रव्याख्याने

४९४५

4945

F. = 18

ॐ श्रीमहामङ्गलमूर्तये नमः । सामविधिब्राह्मणे । अथ यः कामयेत पुनर्भूं प्रजायेयमिती
त्य पुनर्भवनमधिकृत्य तत्तदनुसंधेयोऽस्या मंत्र उक्तः । रात्रिं प्रपद्ये पुनर्भूं मयोभूं कन्यां शिखण्डिनीं पाशह
स्तां युवतीं कुमारिणीमादित्यश्चक्षुषे वातः प्राणाय सोमो गंधाय आपः स्नेहाय मनोऽनुज्ञायै पृथिव्यै श
रीरमिति । अस्यां रात्रौ जपमात्रात्सिद्धिः । अस्याः फलं मरणाज्ञानं परमफलं तु मोक्ष इति तत्रैवोक्तं । अ
यं देवीविषयो मंत्रः । कन्या कुमारी स्त्री महीति तत्र यथार्थस्य कन्यां कुमारिणीमित्यत्र अप्यभिज्ञानात् । रा
त्रिं तद्रूपां अस्यास्तनुस्तमो हारा निशा दिवसनाशिनीति देवीमुपक्रम्य हरिवंशोक्तेः । पुनर्भूः असुर
वधार्थं नानावतारपरिग्रहात् । अत एव मयोभूः प्राणिनां सुखदात्री कन्या अजातपुंस्पर्शा रतिरध्या
चातिसुंदरीति शैवोक्तेः । शिखण्डिनीं मयूरपिच्छभूषणां मयूरकलापध्वजं भूषणं च भगवतो
स्तु मयूराणामंगैः श्च भास्वराध्वजेन शिखिवर्हाणामुच्छ्रितेन समाहृतेति हरिवंशोक्तेः । पाशहस्तां अ
सुरवधार्थं तथा युवतिर्नित्यं बाल्यवार्द्धक्यावस्थारहिता । कंसमोहनावतारे क्षणांशेश्वाभिनयेऽपि त

दाधे

राम

दानीमेवयौवनाविष्करणोक्तेः कुमारिणीं कुत्सितदैत्यान्मारयतीति तच्छीलां एवंभूतायाराज्ञ अभि
मानिनीदेवतायाः प्रभाकाश्यादित्यश्चत्रुषे चक्षुरक्षितुं यत्नवामवन्निति क्रमेणार्थः मनस्तदधिष्ठा
त्रीदेवताऽनुज्ञामनुज्ञानंज्ञानमात्रंरक्षितुंभवतु पृथिव्यै शरीरमित्यस्यविभक्तिपरिणामेन पृथिवी
शरीरायेत्यर्थः एवंरात्रौरात्रिसूक्तं जपेदित्येतन्मूलकद्वितीयविधानेस्पष्टं सप्तसंज्ञावलाद्बुलस्तः अथ
माध्यायांतर्गतस्तुतिपाठोप्येतन्मूलकइत्यपरे अथासप्तशतीमवसारप्रयोजकसप्तशतस्तोममंत्रवि
भागोदर्शितः कात्यायनीतंत्रे मार्कंडेयऋषिणोक्तः प्रथमश्लोकतः प्रिये ओमादिवर्णसंभूतोद्वितीय
स्वरसंयुतः ओमकारस्तस्यादिः मकारः द्वितीयस्वरआकार इत्यर्थः नपांतंप्रवदेन्मंत्राः सर्वेवाष्टादश
प्रिये वेश्येवाचतनः श्लोकाश्चोमाद्याः पंचमंत्रकाः ओमाद्यश्चाद्यायेषामितिमृगनयनावत्समासः नृप
स्योक्तिमंतवर्णोद्वादशस्वरसंयुतः मंतवर्णोयः सचद्वादशस्वरेणऐकारेणआदिभूतइत्यर्थः सका
रोविंदुसंयुक्तश्चांतेस्तोमनुरीदृशो मनुर्मन्त्रइत्यर्थः वैश्यावाचपुनर्देविस्वरैकादशाएकारः वह्निवीजं
विंदुयुक्तंमंतेस्यान्मनुपंचकं वह्निवीजंरमिति मार्कंडेयऋषिणोक्तंमंत्रत्रयमुदाहृतं आदियुक्तंचस्तु

नस्त्वरयुग्मास्तांपरं भुवनस्वरश्चेति युक्तं वाहुसांवो इति राजोवाचेति परांमत्राभादितां ताः शुभानने
अथोवाच ऋषिर्ज्ञानमस्तीमादिसुरेश्वरि सर्वैश्वर्येश्वरीचांते मंत्रो वेद्यास्त्वस्युटाः राजोवाचेति भगवन्नादि
रंहेवि विद्यांवर मंत्रत्रयमिदं स्मातं ततो ऋषिरुवाच ह निसैव सापदं चादौ प्रभुरंते स्वमंत्रकाः ब्रह्मोवाचत
तश्चास्का त्वं स्वाहादि महासुरे अंते पंचदशे तेषु मंत्रास्तु परमेश्वरि एवं स्तुतादि ऋष्युक्तिर्वांत मंत्राश्च स
प्तवे ततो भगवदुक्तिस्तु भवतादिमनुद्वयं वं चितेति च ऋष्युक्तिमंत्रौ द्वौ परमेश्वरि ऋष्युक्तिश्च तथैव सा
दिमंत्रद्वयमुदाहृतं सर्वे श्लोकास्त्विहाध्याये स्त्र स्तुत्युक्त सप्ततिक्रमात् ७८ मध्ये चतुर्विंशतिका ग्रन्थे मं
त्राः प्रकीर्तिताः सर्वाश्चाहुतयो ज्ञेया चतुरुत्तरकं शतं १०४ उवाचांतास्त्वत्र वोध्या मंत्रा भुवन १४ संख्यकाः
इति प्रथमचरित्रनिर्णयो नाम विंशतितमं पटलं ईश्वरोवाच द्वितीये ऋष्युवाचेति नव षष्ट्या कुति
क्रमात् ६९ ततस्तृतीयेध्याये तु ऋषिरुवाच देशिके पंचत्रिंशत्रावे मंत्राः श्लोका ज्ञेया वरानने देव्युवा
चेति मंत्रांते मंत्रश्लोकोयतः प्रिये अर्थोक्तिः पुनः श्लोकाः पंचमंत्राः सनातनाः एवमाहुतयस्तत्र चत्वा

राम २

नितयोरपि वदामिति विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः उमा गौरी सती चंडी सुंदरी
सुभगा कृष्णा एवं युवतयः स्त्रयः पुरुषत्वं प्रपेदिरे केवलपुरुषत्वमपीत्यर्थः एतावन्न सर्ववे
द्यास्तत्क्रिया च न सर्ववेद्येत्याह चक्षुष्मंतो न पश्यंति पश्यंतो न शृण्वंति नच चक्षुष इति तानेवं तत्स्व
पश्यंति नितं तरेन हि इत्युपाद्यति पाठांतरं ततः ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीस्त्रयी रु
द्राय गौरीं वरदां वासुदेवाय च श्रियं ततः स्वरूपात्या सार्द्धं तातेक्रमेण ब्रह्मा सृष्ट्यधिका
रं विष्णुश्च पालनाधिकारं रुद्रः संहाराधिकारं कृतवानित्यर्थः इयं त्रयी महाकाली
जन्यत्वात्कर्मतस्तमोमयी सितो त्रियमित्युक्तेः रूपतः सत्वमयी एवं च तमः सत्वयोः ।
सांसामंत्र्य ब्रह्मा च महालक्ष्मीजन्यत्वाद्धिरण्यगर्भो वित्युक्तेश्च रूपतः कर्मतश्च रजोमय इति
तत्र रजो हि गुणं विष्णुः सरस्वतीजन्यत्वात्सात्विकः कर्मतः कृष्णं वपुरुषमित्युक्तेः रूपतस्त
मोमय इति तत्र सत्वतमसोः समता लक्ष्मीस्तु ब्रह्मणि हि गुणे रजोगुणा रुद्रो महाका
लीजन्यत्वात्कर्मतस्तमोमयः श्वेतांग मित्युक्तेः रूपतः सत्वमय इति तत्र सत्वतमसोः
साम्य गौरी तु सरस्वतीजन्यत्वाद्गौरीमित्युक्तेश्च कर्मतो रूपतश्च सत्वमयीति स त्वैद्वेगुण्ये
तत्र अत एव ततद्गुणानुरूपं सृष्ट्यादिकर्म तेषां एवं च ब्रह्मविष्णवोः स्त्रीपुंसमिथुनं

स॰पू॰
६

मिलितागुणत्रयमपि शिवमिथुनेनेतत्सर्वं त्रिगुणं प्रकरणं तमःरजसः सर्वथाऽभावइतितत्त्वं
पतेप्रमथाब्रह्मादयः तदग्रेब्रह्मणोविष्णुर्विष्णोश्चब्रह्मेतिब्रह्मधारा विष्णोर्ब्रह्माब्रह्मणोविष्णुरि।
तिविष्णुधारा रुद्रात्रुद्रस्तस्मात्पुनारुद्रइतिरुद्रधारा सरस्वत्याःकालीकालीतः सरस्वती
तिसरस्वतीधारा लक्ष्म्यालक्ष्मीलक्ष्मीतोलक्ष्मीरितिलक्ष्मीधारा सर्वत्रापिगौरीकेशवौलक्ष्मी
ब्रह्मणोसरस्वतीशंकरौचेतिसहजौ सर्वत्रब्रह्मणःसरस्वतीविष्णोर्लक्ष्मीःशिवस्यगौरीपत्नी
त्येतत्परिकीर्तितिः सर्वेषांरूपकर्माणिमूलवदेवदेव कदाचित्कल्पभेदेव कदाचित्कल्पभेदेन
स्थानभेदेनचालक्ष्मीतःकालीसरस्वत्योःसरस्वत्याःसकाशादितदेकाल्याःसकाशादि
तदेविष्णोब्रह्मरुद्रौब्रह्मणोरुद्राद्ब्रह्मविष्णूइत्यपिस्वेच्छयादिवशात्तिनानाप्रकारशेरा।
एणदिस्यहरिश्चिक्रमेकश्चिद्दिशेषः एतेसर्वेपिसर्वज्ञत्वादिगुणा [illegible] तिः ततदपिकार

३

मेयत्वात्किं विद्वत्त्वादिव्यवहारोऽपि सत्योऽर्थब्रह्मादिनियम्यत्वाच्च एवं ये जीवाः उपासनादि
कर्मणा तत्तल्लोके सारूप्यं प्राप्तास्ते तत्तल्लोकीयब्रह्मवासुदेवादिभिः समानाकारत्वाद्ब्रह्मा
दिसंज्ञाभाजो जीवा एव एषामपि कर्मतद्रूपतदधिकारभाक्त्वं एषां सर्वेषां मूलाभेदेन तद
भेदस्यसत्वेन स्वात्मनोऽऽवरणहीनतया नैर्ज्ञानेन च साक्षित्वेन स्फुरतीति नैविरुद्धा अत एव दे
वीपुराणे पदैस्त्रिभिर्बलिर्बद्धो वागादित्रिपदाथवा उत्पत्तिस्थितिनाशेषु रजादित्रिगुणाथ
वेति त्रिगुणाथवेति त्रिगुणपदनिरुक्तिर्दर्शिता अहं सर्वमिदं भूतं त्वं च देवि न संशयः त्व
यामया च देवेशि ओतप्रोतमिदं जगदिति तत्रैव देवीप्रतिशिववचनाच्च अत एव मत्स्ये महा
लक्ष्म्यादिजन्यब्रह्मादीनामेवाण्डस्रष्टृत्वतद्भेदकत्वतत्पालकत्वादीनि प्राधानिकरहस्येऽभि
उक्तानीति बोध्यं स्वया सह संभूय याविति चाण्डमजीजनत् विभेद भगवान्रुद्रस्तद्द्वोर्यास्र
हृवीर्येणेति अण्डमध्ये तु सकलं प्राणिजातमभूत्ततः तत्सर्वं पालयामास लक्ष्म्या सह जनार्दनः संज
हार जगत्सर्वं महागौर्या महेश्वरः एवं चराचरं सर्वं महालक्ष्म्या अभूत्पुरस्सरं तेन च समुत्प
न्नो ब्रह्मादेवाश्च सर्वं तदिति यामले एवं च पृथिवीतत्वाधिष्ठात्र्यभूत्तद्धरेर्योगनिद्रासंपादि
का या अपि महाकाया अपि महाकाली सा मूलशक्त्यभेदादेवतया स्तूयते सर्वं सा विद्या
परमात्मैक्ये इत्यादिना क्रियमाणसाक्षित्वेन स्फुरतीति नैविरुद्धा एवं जडात्मिकायाः प्रकृते

कोऽपरि इत्यादिश्लोकरूपतः सप्तत्रिंशश्च (३७) विज्ञेया देवतामन्त्ररूपतः एकचत्वारिंशा (४१) दि
ह्रस्व्याकृतिर्नवमे शुभे देवता भैरवी तारा शृणु गोप्यं वरानने इति नवमोऽध्यायः ऋषिर्निशुं
भं निहतमित्यादि हृदयमन्त्रके ततो देवीति मन्त्रो ह्येकैकवाहं मन्त्रमो पुनर्देव्यैकमन्त्रेण अष्टमन्त्रा
उदीरिताः ऋषिस्ततः प्रवर्तते सार्द्धद्वाविंशतिः स्वयं द्वात्रिंशान्नवमस्तत्र एको षड् मनुस्मृतः दश
मे सिंहमासीना शूलपाशविधारिणी सुरम्या चतुर्भुजा बाणचापहस्ता शुभेक्षणा इति दशमोऽध्यायः
द्वाविंशतितमः पटलः ऋषिः छमेधा विरमातः प्रोक्तदेव्या ततः शुभे चतुस्त्रिंशत्तथा श्लोका मन्त्रास्तत्संख्य
काश्चते ततो देव्येकमन्त्रेण वरदाहं सुरेश्वरि देवाऊचुस्तथा सर्वाबाधाप्रशमनं तथा श्लोके नैकेन दे
वेशि देव्युवाच ततः परं वैवस्वतेन्तरे प्राप्त इत्यादि श्लोकाश्चतुर्दश सार्द्धाः सर्वाकृतिर्देवि पंचाशांमेवसंयु
ता वैष्णवी देवता ह्यत्र महाग रुड वाहिनी इत्येकादशोऽध्यायः देव्युवाचेति च ततः एभिस्तवैश्च मां स
सदा इत्येतैर्द्वनसहिता अष्टविंशतिरूपकाः ततश्च ऋषिरुवाच इत्युक्त्वा श्लोकमादितः श्रुद्धि युक्तं

वेदाचित्तु मंत्रं पठित्वा ततस्तु तदध्यायदेवतायै स्वाहा इत्येवं सर्वशदध्यायदेवतां तर्पयामीति ततश्चिरो नत्स दध्या
यदेवतायै नम इति पूजने हुत्वा कुः एवं होमाशक्तौ जयंतीमंत्रेणैव नमो देव्या इति मंत्रेण वा सर्वमंगलेति मंत्रे
ण वा होमं कुर्यात्र पूजा च ८ जुहुयात्स्तोत्रमंत्रैर्वा चंडिकायै शुभं हविरित्यपि रहस्ये कात्यायतंत्रोक्तमंत्रविभाग ए
वाभियुक्तैः सर्वोद्धृत्य दर्शितस्तथाहि अथ सप्तशत्यां तु श्लोकानां शतपंचके ५७८ श्लोकैः सप्तशती स्तोत्रे तत्र प्रथमा
तं संख्यया १ विभज्य जुहुयान्मंत्रैरिति कात्यायनीमतं ततः [illegible] मार्कंडेय उवाचैकः सावर्णिराद्यस्ततः परं श्लोकम
न्त्राः सप्तदशार्द्धश्लोकात्मकस्ततः एकोनविंशादेवं तु चैत्यकोक्तिर्विंशतिस्तथा २ पुनरर्द्धं पुनः श्लोकत्रयमर्द्धं पुनर्भ
वेत् पंचविंशतिरेवं स्याद्राजा षड्विंशतिस्ततः अर्द्धश्लोकात्मकं मंत्रद्वयं वैश्यपुनर्भवेत् एकोनत्रिंशादेवं तु मंत्रसं
ख्यात्र कीर्तिताः ५ पुनरर्द्धं पुनः श्लोकत्रयमर्द्धं पुनर्भवेत् मार्कंडेय पुनश्चार्द्धं श्लोकं श्लोकात्मकः पुनः ६ अर्द्धश्लो
कात्मको मंत्रो राजार्द्धं श्लोकमंत्रकः मंत्रा स्युस्त्वाद्विंशादेवं श्लोकमंत्रचतुष्टयं ७ पुनरर्द्धमृषिश्चार्द्धं श्लोकमंत्राः
पुनर्दश पुनरर्द्धः पुना राजैत्येकोनाषष्ठिरुच्यते ८ पुनरर्द्धं पुनः श्लोकः पुनरर्द्धं पुनरृषिः पुनरर्द्धं पुनः श्लोकाश्च
रामंत्राः पुनरर्द्धकाः ९ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः इत्येव पाठो मंत्राणां मेकसप्ततिरुच्यते १०

द्रस्तार्द्धश्लोकमंत्रोथ श्लोकमंत्रास्त्रयोदश। चार्द्धश्लोकऋषिश्चार्द्धश्लोकमंत्रास्तु पंचवै ११ पुनरर्द्धं तु मंत्रा
स्तास्तु पंचनवतिस्मृताः भगवानर्द्धमंत्रोर्द्धो ऋषिश्लोकार्द्धकं पुनः १२ श्लोकः पुनरृषिश्लोकद्वयं मंत्रद्वयं भ
वेत् श्लोकानामष्टसप्तत्या चतुर्भिरधिकं शतं १३ आध्यायादावेव ऋषिरुवाचेति सकृन्मनुः अष्टषष्टिमिताः
श्लोकास्तावन्तो मनवो मताः १४ एकोनसप्ततिः सर्वेध्याये मंत्राः प्रकीर्तिता द्वितीयके आदावृषिरुवाचैकपंच-
त्रिंशान्ततः परं १५ निहन्यमानाद्याः श्लोकाः मुखरागाकुलाक्षरं इत्यन्तादेव्युवाचैकागर्जगर्जेति चापरः १६ श्लो
को ऋषिरुवाचेति पुनश्च श्लोकपंचकं चतुश्चत्वारिंशदेवं सर्वे मंत्रास्तृतीयके १७ आद्यो ऋषिरुवाचेति शक्राद्या
श्लोकमंत्रकाः षड्विंशास्तु ऋषिश्लोकद्वयं देवी ततः परं १८ ध्रियतां त्रिदशाः सर्वे यदस्मत्तोभिवांछितं इत्यर्द्धश्लो
कमंत्रोथ देवा ऊचुस्ततः परं १९ भगवत्याहृतं सर्वमित्यर्द्धश्लोकमंत्रकः षट्द्वयं निहन्ताद्यं च श्लोकमंत्रद्वयं भवे
त् २० ऋषिश्लोकाश्च चत्वारो मनवः परिकीर्तिताः षड्विंशश्लोककेध्याये चत्वारिंशद्द्वयाधिकं २१ षट्सप्तति
श्लोकयुक्तेध्याये मंत्रास्तु पंचमे एकोनत्रिंशदधिकं शतं कात्यायनीमते २२ एको ऋषिरुवाचेति पुरा शुंभादय
श्चषट् श्लोकमंत्रास्ततो देवा ऊचुश्चैवाष्टमो मनुः २३ नमो देव्यादिका [illegible] श्लोकाः पंचमंत्राः प्रकीर्तिताः त्रयो

राम
५

दशैवं मंत्रास्तु यादेवीत्याद्ययोपि च २४ एकविंशतिकाः श्लोकाश्चांत्यतास्तेषु मंत्रकाः प्रतिश्लोकं त्रयो मंत्रा ज्ञेयास्ते च त्रि
षष्ठिकाः २५ पुनः श्लोकात्मको मंत्रस्त्रिमंत्रः श्लोककः पुनः त्रयोविंशतिश्लोकेषु मंत्राश्चैव सप्तषष्ठिकाः २६ यादेवी सर्वभू
तेषु विष्णुमायेति शब्दिता नमस्तस्यै इति प्रोक्तो विंशत्यक्षरको मनुः २७ नमस्तस्यै इति प्रोक्तो द्वितीयश्चतुरक्षरः अष्टा
क्षरस्तृतीयोपि नमस्तस्यै नमो नमः २८ एवं द्वाविंशतिश्लोके ज्ञेयं मंत्रत्रयं बुधैः पूर्वैस्त्रयोदशो मंत्रैः सप्ताशीतिरुदाहृतो नव
स्तुता सुरेतिच श्लोकद्वयं चैव पुनर्ऋषिः पुनः सप्तदश श्लोका ऋषिश्लोकत्रयं ततः ३० इतश्चैव नवश्लोका ऋषिरेकोंविका
ततः एकइत्यसे कश्लोकइत्यर्थः चतुःश्लोकी पुनर्द्वितश्चतुःश्लोकी पुनः शिवा ३१ श्लोकद्वयं मिलित्वा तु चत्वारिंशन्नवा
धिकं अशीत्यपि च संयोगे एकोनत्रिंशताधिकं ३२ शतमेकं तु १२९ विज्ञेयमाहुतीनां च पंचमे विंशतिश्लोकसंयुक्ते ष
ष्ठेध्याये प्रकीर्तिताः ३३ सर्वे श्लोकामंत्ररूपा देव्येकाथ ऋषिद्वयं चतुर्विंशतिमंत्रा स्यात्समिन्नेवं परिकीर्तितं ३४ पंचवि
शश्लोकयुक्तेध्याये मंत्रास्तु सप्तमे सर्वे मंत्राः श्लोकरूपाः ऋषुवाच द्वयं ततः ३५ सप्तविंशतिरेवं तु मंत्रसंख्याः प्रकीर्तिताः
सार्द्ध कषष्ठिश्लोका अष्टमेध्याये प्रकीर्तिताः ३६ एकषष्ठिश्लोकमंत्रा श्चैते द्वेश्लोकमंत्रतः आद्यावेक ऋषिश्चैव त्रिषष्ठि
मंत्रसंततिः ३७ एकोनचत्वारिंशद्भिः श्लोकैर्युक्ते समीरिता अध्याये नवमे मंत्रास्तावंतोथ मनुद्वयं ३८ राजा ऋषिश्चे
तिचैकचत्वारिंशन्मनुस्तवयं सार्द्धसप्तान्विते विंशश्लोके स्तु दशमेन्विते ३९ सप्तविंशतिमंत्रास्तु श्लोकरूपास्ततो तिमः

अर्द्धश्लोकात्मको मंत्रोऽथ ऋष्युवाचद्वयं तथा ४० देव्युवाचद्वयं चैव द्वात्रिंशन्मंत्रसंग्रहः श्लोकानां सार्द्धपंचाशद्द्वयमे
काद्श्लोकं स्फुटं ४१ पंचाशच्छ्लोकमंत्राश्च तदंते ऽर्द्धश्लोकमंत्रकः शाकंभरीति विख्यातिं तदा यास्याम्यहं भुवि ४२ ए
षोऽर्द्धमंत्ररूपः प्रोक्तः केचिदत्रापि चक्षते देवीद्वयमृषिश्चैको देवा एकमितीरितं ४३ पंचाधिकं तु पंचाशन्मंत्राश्चे
माः परिस्फुटं अष्टत्रिंशच्छ्लोकयुक्तेऽध्याये द्वादशात्मके ४४ चत्वारिंशच्च एकश्च मंत्रास्तत्राकृतिद्वयं अर्द्धश्लो
कात्मकौ श्लोकः सप्तत्रिंशन्मितास्तुनि ऋषिः ४५ देव्युवाचेति चैकैकमेवं संख्या समुदीरिता त्रयोदशे सार्द्धसप्तदश
श्लोकाः प्रकीर्तिताः ४६ ऋषिरुवाचेत्यारभ्य भोगस्वर्गापवर्गदा इत्यंताः पंच मंत्रास्ते मार्कंडेय ततः परं ४७ इति
तस्य वचः श्रुत्वेत्यर्द्धमंत्रः प्रकीर्तितः श्लोकमंत्रास्ततो ज्ञेयाः पंचैवाथार्द्धपद्यकं देव्युवाचेति मंत्रोऽयं ततः श्लोकस्तु मंत्र
कः मार्कंडेयस्ततो मंत्रः श्लोको मंत्रद्वयं ततः ४८ ततो देवीषडुक्तानि सप्त मंत्राः प्रकीर्तिताः मार्कंडेयस्ततः पद्यद्व
यं मंत्रत्रयं स्मृतं ५० आहत्याध्यायिको मंत्रः सावर्णिर्भविता मनुः एकोनत्रिंशत्संख्याका मंत्रा अत्र स्मृता बुधैः
५१ केचित्तु एकादशार्द्धाकृतयो द्वादशश्लोकमंत्रकाः इत्येवं वचनैः षड्विंशन्मंत्रास्ते उक्तसंख्यकाद्रुताहुस्तत्र कात्या
यनीतंत्रविरोधः स्पष्ट एवेति दिक् तंत्रसारकृता तत्प्रयोगसारे वाराहीतंत्रे संस्कृत्य भूमिं संस्थाप्य कलशं तीर्थ

राम

६

वारिणा पूरयित्वा स्वर्णगर्भे क्षिपेद्धनं ततः धर्मकामः क्षिपेद्रत्नं धनकामस्तु मौक्तिकं श्रीकामः सततं न्यस्ये
त्कामार्थी रोचनं न्यसेत् मोक्षकामो न्यसेद्धेमं जयकामोपराजितां उच्चाटनार्थी माघ्रीं च वश्यार्थी शिखिमल्लिकां मा
रणाय मरीचं च केतवं मोहनाय च आकर्षणाय पारं तीं प्रक्षिपेत्कलशोदरे जपेन्मंत्रं महेशानि श्रृणुष्व गदतो मम
क्षिप्रे यत्कलशे हस्तान्न्यदाय यज्जपेन्मंत्रं नकुलीशं वामकर्णयुतमैंद्रं तु शेखरं द्विर्वाग्भवं समुच्चार्य मायावीजं ततो वदे
त् चामुंडायै ततः पश्चाद्द्विठांतो मनुरीरितः ऊँ ऐँ सँ ह्रीँ चामुंडायै स्वाहा १० इतिमित्यनेन कर्तागन्मासौ जपेद्द्वादशलक्षं
तु स्नायात्तेनैव वारिणा हुनेत्सर्पिःप्रलिप्तांश्च तिलधान्यादितंडुलान् धर्मार्थकाममोक्षाणां संसिद्ध्यै पायसं हुनेत् मारणे
मोक्षणे चैव तथोच्चाटनकर्मणि हुनेन्माषं त्रिमधुकं मोहने मधुपायसं स्तंभने मातुलफलं वश्ये तु श्वेतसर्षपान् धर्मार्थ
काममोक्षार्थं पूर्वाशाभिमुखो हुनेत् मोहने मारणे चैव दक्षिणाशामुखो हुनेत् उच्चाटने उत्तरास्यो दिशामेवमवस्थितिः
आदिमारभ्य प्रजपेत्सृष्टिक्रम उदीरितो जपेच्छक्रादिमारभ्य कुंभदैत्यवधावधि आद्याच्छक्रादि [illegible] पर्यंतं स्थिति
क्रम उदाहृतः शेषमारभ्य आद्यंतं संहारेयं क्रमो भवेत् स्थितिपाठः सर्वकामे मुक्तिकामे च संहृतिः श्रीकामे पुष्टिकामे
च सृष्टिक्रम उदाहृतः सावर्णिः सूर्यतनय इत्यारभ्य सावर्णिर्भविता मनुरित्यंते पाठ इति सृष्टिक्रमः पुरा शुंभनिशुंभेत्या
दि नवाध्यायान्पठित्वा शक्राद्यध्यायांते पठेदिति स्थितिक्रमः शक्रादिमारभ्य तस्मात्कुरुतसं विज्ञानवकुर्वीक्षिणात

रुत्तराध्यायमारभ्येत्यर्थः शक्रादिपर्य्यन्तमित्यस्य तदध्यायान्तमित्यर्थः एवं देव्या वरं लब्धेत्यादिश्लोकण
ठसंहारक्रमेण सावर्णिः सूर्य्यजन्मय इति श्लोकान्तं पठनीयमिति संहारक्रमः संकटे चायं प्रशस्त इति दक्षि
णात्संप्रवक्ष्ये त्वेवं पाठक्रमः वेदादिर्वाग्भवं चैव मायाकामं तथैव च पृथ्वीरेफं वामनेत्रं नादबिंदुविभूषितं ।
मायाकामं नमः पश्चान्मूलमंत्रमुदाहृतः लक्षं जपेन्मूलमंत्रं सर्वकामार्थसिद्धये ॐ ऐं ह्रीं क्लीं ह्रीं क्रीं क्लीं नमः
९ शतमादौ शतं चान्ते जपेन्मंत्रं नवाक्षरं चंडीं सप्तशतीं मध्ये संपुटेयमुदाहृतः सकामैः संपुटं जाप्यो निः
कामैः संपुटं विना सप्तशतीस्तोत्रस्य मेधाऋषिर्गायत्र्यनुष्टुब्बृहतीपंक्तिजगतिछंदांसि महाकालीमहाल
क्ष्मीमहासरस्वत्यो देवता नवकं ऐं ह्रीं क्लीं बीजानि स्त्रोंशक्तिः इष्टसिद्ध्यर्थे जपे विनियोगः ध्यानम् याचंडीम
धुकैटभादिदलनी या माहिषोन्मूलिनी या धूम्रेक्षणचंडमुंडमथनी या रक्तबीजाशनि शक्तिः शुंभनिशुंभ
दैत्यदलनी या सिद्धिलक्ष्मीः परा सा देवी नवकोटिमूर्तिसहिता मां पातु विश्वेश्वरी इति अथ तत्र गोप्यश्लोकाः चं
डीपाठफलं ब्रूहि मे श्रुत्वा जगदतो मम एकाहमादिपाठानामपहं पठतां नृणां संकल्पपूर्वं संपूज्य न्यासांगेषु म
न्त्रसहितम् मन्त्रं नु अन्वक्षरं क्लीमित्येतत् नवार्णविधौ वक्ष्यमाणश्लोकन्यासो वा पश्चाद्दक्षिणादानेन फलगा

राम

७

प्नोतिमानवः उपसर्गोपशमं सर्वं त्रिरावृत्तं पठेन्नरः ग्रहदोषोपशांत्यर्थं पंचावृत्तं वरानने महाभये समुत्पन्ने सप्ता
वृत्तमुदीरयेत् महाभये महोत्पातादिजे भये नवावृत्याभवेच्छांतिमुखेस्वारागार्गिजाद्भयात् राजवश्याय षट्सप्तैच रुद्रावृ
त्तमुदीरयेत् अर्कावृत्याकाम्यसिद्धिर्वैरिनाशश्च जायते मन्वावृत्यारिपुर्वश्यस्तथास्त्रीवशतामियात् सौख्यं पंचदशा
वृत्याश्रियंचाप्नोतिमानवः कलावृत्यापुत्रपौत्रधनधान्यागमं विदुः राजभीतिविनाशाय वैरस्योच्चाटनाय च परस्परवि
रोधाय कुर्यात्सप्तदशावृत्तं तथाष्टादशकं प्रिये महाव्रणविमोक्षाय विंशावृत्तं पठेन्नरः पंचविंशावर्तनाच्चभवेद्बंधविमो
क्षणं संकटे समनुप्राप्ते दुश्चिकित्सामये सदा जातिध्वंसे कुलोच्छेदे आयुषो नाशआगते वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा
क्षये तथैव त्रिविधोत्पाते तथाचैवातिपातके कुर्याद्यत्नाच्छतावृत्तं ततः संपद्यते शुभं विपदस्तस्य नश्यंति ऽग्रेतेयातिपरांग
तिं श्रियोवृद्धिः शतावृत्याराजवृद्धिस्तथापरा मनसाचिंतितं देवि सिद्ध्येदष्टोत्तराच्छतात् शताश्वमेधयज्ञानां फलं प्राप्नोति सु
व्रते सहस्रावर्तनाल्लक्ष्मीरावृणोतिस्वयंस्थिरा भुक्त्वामनोगतान्कामान्नरोमोक्षमवाप्नुयात् यथाश्वमेधः क्रतुषु देवानां च
यथाहरिः स्तवानामपिसर्वेषां तथासप्तशतीस्तवः नातःपरतरं स्तोत्रं किंचिदस्ति वरानने चंड्याःशतावृत्तपाठात्सर्वाः सिद्ध्यंति
सिद्धयः इति प्रयोगसारोक्तं पुराणेपि वाचकं पूजयित्वा तु यथाविभवविस्तरैः वाचयेत्ततो राजा देवीमाहात्म्यमुत्तमं
तदंते शांतिशाद्दस्तु जनस्य सन्नृपस्य च अनेनविधिनाराजन्यः पठेच्छृणुयादपि चिंतयेद्वाचयेद्वापि तस्य पुण्यफलं शृणु

8

वाजपेयसहस्रस्य अश्वमेधशतस्य च यत्फलं लभते तात तत्फलं शतधा भवेत् गंगातोयाभिषेकेण तीर्थे
नैमिषपुष्करे यत्फलं लभते तात तत्फलाद्युताधिकं ब्रह्महत्यादिपापानां शमनं परमं मतं वर्द्धनं चायुर्धर्मा
णां काममोक्षफलप्रदं पुत्रदं पतिदं तात जयदं सौख्यदं परं अनेन विधिना वत्स प्राप्नोतीश्वरान्नरः इहकीर्ति
श्रियं ब्राह्मीं परत्र भवतीलयमिति भवती लक्ष्मीः तथा मारीचकल्पे रात्रिसूक्तं जपेद्यो दोमध्ये सप्तशतीस्तवं प्रांते तु
जपनीयं वै देवीसूक्तमिति क्रमः एवं संपुटितं स्तोत्रं सर्वकामार्थसिद्धिदं पठनीयं सूक्ते वैदिके द्वे त्वेके एतदंत एव प्रागु
क्ते इति ते प्रामाणिकाः वक्ष्यमाणोत्सवस्त्वस्मात् प्रकारांतरमपि तंत्रोक्ते शुक्लाष्टमीं समारभ्य यावत्कृष्णचतुर्दशी वृद्धि
कोत्तरया जाप्यं पूर्वं संपुटितं तु तत् एवं देवि मया प्रोक्तः पौरश्चरणिकक्रमः तदंते हवनं कुर्य्यात्प्रतिश्लोकेन पायसं रात्रि
सूक्तं प्रतिऋचं तथा देव्याश्च सूक्तकं प्रतिश्लोकमित्यस्य कात्यायन्युक्तमंत्रविभागेन विशेषः समुदाये सूक्ते च वक्तारस्स
लक्ष्मीतंत्रे हुतत्वात्तदवयवश्लोकास्त्वात्र ऋचवृत्तिबोध्यं प्रतिऋचमित्यत्राप्युक्तशेषो बोध्यः अपरश्च अथातः संप्र
वक्ष्यामि नवरात्रिविधानकं जपेदेकोत्तरां वृद्धिं दिनानि नवसंख्यया नवाक्षरीविधानेन संपूज्यार्थविचक्षणः स
हस्रं तु जपेन्मंत्रं प्रत्येकं च यथाविधि कृत्वा दशांशतो होमं मंत्रसिद्धिमवाप्नुयात् अपरश्च बिल्वमूले मासं जपः बि
ल्वदलैर्मधुरत्रययुतैर्मासं होमः दशांशेन क्षीरसंयुतैः कमले होमो वा लक्ष्मीः लक्ष्मीप्राप्तिफलोऽयं प्रयोगः ईदृशस्थले

राम
८

नमो देव्या इत्यादि मंत्रैर्दशांशेन होमः कार्य्यमिति शेषः ब्राह्मणैः कारयेत्तु दक्षिणा विशेषस्तत्रैवोक्तः पंचस्व
र्णाः शताहेन्न पक्षाहे तु तत्त्र्यं पंचाहेन्न स्वर्णमेकं त्रिराहेन तदर्द्धकं एकाहेनोपादकं तु दद्याद्यथाशक्तितो बुध इति श्री
ड्ड तंत्रे प्रत्येकावर्त्तने देवि दिसमेधेन संमितं त्रिराहस्यालमेत्कामान्नेचाहस्यारिपुं जयेदिति सर्वेष्टसिद्धिः कात्याय
नाय विप्राय देकन्या कुमारी धीमहि तन्नो दुर्गा प्रचोदयात् इत्येतद्गायत्रीयजुर्वेदे अथ प्रयोगांतरं कात्यायनीतंत्रे पू
र्वोक्तविधिना षोडशांगुलमितं चतुरंगुलोन्नतं स्थंडिलं कृत्वा तत्र शुद्धगोघृतेनैकस्मिन्माठे कृतवर्ति पुत्रयोदश दीपान्प्रज्वा
ल्य दीपेषु प्रथमादिदीपे प्रथमाय देवतामावाह्यासनपाद्यादिगंधदानांतां पूजां कृत्वा पुष्पसमर्पणसमये वक्ष्यमा
णेन नवभिः श्लोकैः प्रतिश्लोकं पुष्पाणि समर्प्यांते पुनर्नवभिः श्लोकैः पुष्पाणि समर्प्य धूपदीपौ दत्वा पायसं नैवेद्यं दत्वा
तांबूलं दक्षिणां च दत्वा नीराजयेत् एकं ब्राह्मणं कुमारीं च सुवासिनीं च भोजयेत् संकल्पयेद्वा एवं तत्तद्ध्याय देवता
वाहनादि ब्राह्मणभोजनांतं प्रत्यध्यायं कुर्यात् अंते प्रभूतनैवेद्यादिभिर्महापूजा अनुग्रहे पूर्वोक्तसमाप्तिः नि
ग्रहे तु परोक्त श्लोकास्तु विश्वेश्वरीं जगद्धात्रीं १ सुरासुरैः पूर्वमभीष्टसंश्रयौ २ यासांप्रतं चोद्धतदैत्यतापितै ३ करोतु सा नः ३
याच स्मृता तत्क्षणमेव हंति नः करोतु सा ४ सर्वाबाधाप्रशमनं ५ अत्र वैरिविनाशनमित्यत्र रोगनाशनमि
त्याद्यूहः एवं दैत्यतापितै दित्यत्रापि सर्वमंगलमांगल्ये ६ सृष्टिस्थितिविनाशानां ७ शरणागतदीनार्त ८

करोतु सा नः ३

कार्यस्वरूपे सर्वेषां ८ एतेऽनुग्रहेन वश्लोकाः वश्ये तु विशेषः ॐ क्लीं रक्तचामुण्डे तुरु तुरु अमुकं मे वशमानय स्वाहा
अनेन शतध्यानत्वध्यायमाद्यं तयोः पूजा सर्वांते ऽयुतमंत्रजपः अयुतहोमश्च होमयेत् हुते लेन रक्तचंदनराजिका
सहस्राहुतिमात्रेण राजानं वशमानयेत् मधुवासोकपुष्पं च रात्रौ कृत्वा तु पूर्ववत् चक्रवर्ती भवेद्वश्यं चंडीमंत्रप्रभावतः
अंते शतं ब्राह्मणाः कुमार्यश्च भोजनीयाः धनार्थे विल्वपत्रैः पूजा वश्यार्थं करवीरैर्जवापुष्पैर्वा पुत्रार्थं तु तुलसीदलैः पुष्प
र्थं पंकजैः महाप्रयोगे तु षोडशमाषैः स्वर्णमूर्तिं कृत्वा कलशस्थापनं कृत्वा तदग्रे घटार्गलयंत्रे षट्कोणयंत्रे वा दीपं स्थाप
येत् यंत्रमंत्रं सर्वसाधारणं महति कार्ये ऊनपंचाशद्दिनानि मध्ये चतुर्विंशति तदर्द्धं १२ मल्पे एवमेव स्वर्णमूर्तिपरिमा
णो वोध्यं ब्राह्मणास्त्रयो महत्कार्यकर्तारः अल्पे एकः निग्रहे तु सर्वाबाधाशमननिमित्तसाध्ये एवमुत्का समुत्पत्ते निवेदेत्
अत्र प्रयोगे कश्चित् तर्पणमप्युक्तं त्रयोदशपात्राणि तु कुंकुमेनापूर्य आद्यं तयोः पुष्पांजलिं दत्वा प्रतिश्लोकं प्रथमाध्याय देवतां तर्प
यामीति प्रयोगेण तर्पयेत् तथा त्रयोदश तु अग्निषु क्रमात् तत्तदध्याय देवता आवाह्य संपूज्य प्रतिश्लोकमंत्र प्रथमाध्याय देव
तायै नमः स्वाहेति मंत्रेण पायसेन जुहुयात् प्रत्यहं यावत्प्रयोगसमाप्तिस्त्रयोदश ब्राह्मणाः सुवासिनी कुमार्य एको नुप
नीतोऽष्टवर्ष एकः सपत्नीकश्च भोजनीयः परार्थे प्रयोगे तु सत्वाः संतु यजमानस्य कामा इति प्रतिश्लोकं प्रत्यध्यायं वा पठेत्
अत्र त्रयोदश पात्रेषु त्रयोदश दीपाः इत्युत्तमः पक्षः एकपात्रे त्रयोदश दीपाः इति मध्यमः एकस्मिन्नेव दीपे त्रयोदश देवता
इत्यधमः पक्षो यं विधिर्दीपेषु अक्षतपुंजेषु अग्निषु कुमारीषु वा कार्य इति [illegible] देशाः अथ प्रयोगांतराणि कात्यायनी

राम ९

तंत्रोक्तानि प्रतिश्लोकमाद्यंतयोः प्रणवं जपेन्मंत्रसिद्धिः १ अत्र श्लोकपदं मंत्रोपलक्षकं सप्तशतीमनुलोम
माहृत्य त्रयमादौ अंते तु विलोमं तद्वित्येवं प्रतिश्लोकं तदुक्तं कात्यायनीतंत्रे यथा यच्छुंभदैत्यस्य देवी जाता हिमालये भू
तकार्यास्तु तादृगेवैर्मंत्रभेदैर्वरानने कृत्वा शतावृत्तिपाठं तु शीघ्रसिद्धिः २ प्रतिश्लोकमादौ जातवेदस इति ऋचं पठेत्स
र्वकार्यसिद्धिः ३ अथ प्रत्युच्चारणाद्यादावंते शतं त्र्यंबकं मंत्रं जपेत् ४ प्रतिश्लोकं तन्मंत्रजपश्च सप्त ५ प्रतिश्लोकं शरणा
गतदीनार्त श्लोकं पठेत्सर्वकार्यसिद्धिः ६ प्रतिश्लोकं करोतु सा नः शुभहेत्यर्द्धं पठेत्सर्वकामाप्तिः ७ ऐश्वर्यप्राप्त्यै एवं देव्या वरं ल
ब्ध्वेति प्रतिश्लोकं पठेत् ८ सर्वापन्निवारणाय प्रतिश्लोकं दुर्गे स्मृतेति पठेत् अस्य केवलस्यापि श्लोकस्य कार्यानुसारेण लक्षम
युतं सहस्रं शतं वा जपः १० सर्वाबाधेत्यस्य लक्षजपे श्लोकोक्तं फलं ११ इत्थं यदा यदेति श्लोकस्य लक्षजपे महामारीशांतिः १२ ततो व
व्रे नृपो राज्यमविभ्रंशमन्यजन्मनीति मंत्रस्य जपे पुनः स्वराज्यलाभः १३ हिनस्ति दैत्यतेजांसि स्वनेनेन सदीपबलिदाने घंटाबंधने
बालग्रहशांतिः १४ आद्यावृत्तिमनुलोमेन पठित्वा ततो विपरीतं इति क्रमेणाद्वितीयावृत्या मनुलोमेनेत्येवमावृत्ति
त्रये कृते सुप्रकारे सुप्रीतिः शीघ्रं कार्यसिद्धिः १५ सर्वापन्निवारणाय दुर्गे स्मृतेत्यर्द्धं ततो यदंतिके यच्च दूरे इत्यर्द्धं ततो दारिद्र्यदुःखेत्यर्द्ध
मेवं कार्यानुसारेण लक्षमयुतं सहस्रं शतं वा जपः १६ कां सोऽस्मीत्यृचं प्रतिश्लोकं पठेत् लक्ष्मीप्राप्तिः १७ प्रतिश्लोकमन्नृणा अस्मी
त्यृचं पठेत् ऋणनाशः मारणार्थमेवमुत्कालसमुत्पन्नेति श्लोकं पठेन्मारणोक्ताहुतिभिः फलसिद्धिः १८ ज्ञानिनामपि चेतांसीति


श्लोकजपमात्रेण सद्यो मोहनमित्यनुभवसिद्धिः प्रतिश्लोकं तच्छ्लोकपाठात्स्ववश्यं १९ रोगानशेषानिति श्लोकस्य प्रतिश्लोकं
पाठे सकलरोगनाशः २० तन्मात्रजपे पि वा २१ इत्युक्ता मातरा देवीति श्लोकस्य प्रतिश्लोकपाठे पृथक् जपे वा विद्याप्राप्तिः वाग्दे हत
नाशश्च २२ भगवत्याहृतं सर्वमित्यादिद्वादशोत्तरशताक्षरो मंत्रः सर्वकामदः सर्वापन्निवारणश्च २३ देवि प्रपन्नार्तिहरे इति श्लोकस्य
यथाकार्यं लक्षायुतसहस्रशतान्यतमे जपे प्रतिश्लोकं वा पाठे सर्वापन्निवृत्तिः सर्वकामाप्तिश्च २४ एवं प्रयोगेषु प्रतिश्लोकं दीपाग्रे के
वलमेव नमस्करणोऽतिशीघ्रसिद्धिः २५ प्रतिश्लोकं कामबीजसंपुटितस्यैकचत्वारिंशद्दिने त्रिरावृत्तो सर्वकामनासिद्धिः २६ एक
विंशतिदिनपर्यंतं ह्रौं संपुटीभावस्य प्रत्यहं दशावृत्तो वशीकरणं २७ मायाबीजपुटितस्य षट्पदत्रयसहितस्य सप्तदिनपर्यंतं त्रयोदशा
वृत्तो उच्चाटनसिद्धिः २८ तादृशस्यैव दिनचतुष्टयमेकादशावृत्तो सर्वोपद्रवनाशः २९ एकोनपंचाशद्दिनपर्यंतं प्रतिश्लोकं श्री
बीजसंपुटितस्य पंचदशावृत्तो लक्ष्मीप्राप्तिः ३० प्रतिश्लोकमैं बीजसंपुटितस्य शतावृत्तो विद्याप्राप्तिः ३१ अत्र सर्वकामनाभे
देन ध्यानभेदमाह: वश्ये रक्तवर्णं ध्यानं १ मोहिके कर्बुरं २ उच्चाटने धूम्रं ३ मारणे कृष्णं ४ संताने छाया नीलोत्पलदलश्यामं ५
रत्नाकारध्यानं सर्वकामदं ६ युद्धे कल्पांताग्निसमं तथा ध्यानं ७ जलभये महाशोकयुक्तं ध्यानं ८ विषादिभये पीयूषवर्षविधु
तपूर्णचंद्रसदृशं ध्यानं ९ एकदिने संपूर्णपाठाशक्तौ पा १ द्वि ४ प्र २ का १२ २ एवं क्रमेण सप्तभिर्दिनैरेकावृत्तिः एकैकं चरि
त्रमेकस्मिन्दिने इति त्रिभिर्दिनैरिति केरलाः एतेषां मूलानि तंत्रे द्रष्टव्यानि क्वचिद्गुप्तस्य सप्तशतीमंत्रस्य नारायण ऋषिर्गा
यत्रीछंदः श्रीमहिषमर्दिनीरूपी दक्षिणामूर्तिर्देवता क्लीं बीजं सोऽहं शक्तिः दुर्गाप्रीतये विनियोगः ॐ यन्मोहितो ज्ञानिनोरपि अंगुष्ठा

ष्मां नमः निद्रांभगवतींविष्णोरतुलतेजसीमंस्वाहा जयेतिदेवाश्चमुदामध्यमाभ्यांवषट् ॐ आजघानभुजेसव्ये अनामिका
भ्यां हुं ॐ एतेतस्मिन्महावीर्यैः कनिष्ठिकाभ्यांवौषट् ॐ नीतादिवंरिपुगणाभयमप्यपास्तकरतलकरपृष्ठाभ्यांफट् इत्युक्तं
तत्रमूलंनलभ्यते अस्यस्तोत्रस्यश्लोकादिसंख्याडामरेश्वरतंत्रे अधुनादेविवक्ष्यामिमालामंत्रंनवार्णजं यस्यस्मरण
मात्रेणभुक्तिंमुक्तिंलभेन्नरः १ प्रथमेत्वेकवारेणश्लोकाःप्रोक्ताश्चतुर्दश समाधिनाम्नाप्रोक्तास्तुश्लोकाश्चाष्टौद्विवारतः २
तथाराज्ञाचतुर्वारैःश्लोकानादशकंप्रिये मार्कंडेयेनऋषिणापंचधानवविंशतिः तथैवार्द्धेनसहिता २८ भगवानेकमेकधा
त्रिधाप्रोक्ताश्चविबुधैःसार्द्धषट्त्रिंशदेवहि ४ सार्द्धन्यूनाषट्त्रिंशदित्यर्थः देव्याद्वादशधासार्द्धैकोनषष्टिपर्दा प्रकीर्तिताः ५
ऋषीणांसप्तविंशस्याच्चत्वारितुशतानिवै सार्द्धश्लोकतरकाम्यत्रद्वितेनोक्ताद्विधाप्रिये ६ श्लोकास्त्रयोदशैवात्रप्रोक्ताप्राणप्रियेम
म एवंसप्तशतीसंख्याश्लोकाश्चाष्टोत्तसप्ततिः ७ शतानिपंचदेवेशितेषांसप्तशताहुतिः विष्णुमायादितोभ्रांतिरूपांते आहुति
त्रयं ८ चितिरूपेणादेव्यैतुआहुतीनांत्रयंप्रिये इति यत्तु ग्रहेएकभगवानेकोमार्कंडेयस्तुमार्गेणः देवाःपंचऋषिस्त्रिंशद्देवी
द्वादशाकंतथा वैश्यदूतोपुनर्द्वौद्रोराजोवाचेतिवर्णतः अर्द्धानिपूर्वपरयोःपुनःषोडशाषोडश अर्द्धानिसप्तचदेवेचश्लोकाःपंच
शतंतथा श्लोकाश्चचतुरशीतिरध्यायाश्चत्रयोदश इतिमार्कंडेयपुराणेइतित्रयोदशेत्यर्थः एवमाहुतयःसप्तशतंस्युस्तत्परास्त
च दुर्गाहोमविधानेनश्लोकेश्लोकेआहुतिक्रमात् इत्थंज्ञानार्णवेतंत्रेप्रोक्तमिति तन्तुज्ञानार्णवेतुपलंभामूलंतदर्शनाच्च

कात्यायनीतंत्रडड्डामरतंत्रविरोधाभावान्नादेयं ग्रंथेतत्स्तोत्रपाठेडामरकल्पोक्तो नवार्णसंपुटीकरणप्रयो
गः तत्राद्यौतदुद्धारः ऐंबीजमाद्यंदुसमान[illegible]दीप्तिस्तीं सूर्यतेजोद्युतिमद्द्वितीयं ह्रींमूर्तिवैश्वानरतु
ल्यरूपं तृतीयमानंत्यसुखायचिंत्यं १ चामुंडजांबूनदकांतितुर्यं मुपंचमरक्ततरं प्रकल्प्यं डाषष्ठमुग्रार्तिहरं
सुनीलंयेसप्तमंकृष्णतरंरिपुघ्नं २ विपांडुरंत्वष्टमम्मादिसिद्धंच्चेधूम्रवर्णंनवमंविशालं तेनऐंह्रीं
क्लीं चामुंडायैविच्चे ८ इतिनवाक्षरीमंत्रः नाभिमात्रेजलेमहस्यजपात्कविताशक्तिः अयुतजपे
राजवंधनसंकटादिभ्योमोक्षः अस्मिन्नवाक्षरेमंत्रेमहालक्ष्मीमवस्थिता तस्मात्सुसिद्धः सर्वेषांस
वेदिक्षुप्रदीपकः अनेनात्रसिद्धादिविचारोनास्तीतिज्ञापितं ३ नवाक्षरस्य अस्य ऋषयोब्रह्मवि
ष्णुमहेश्वराः छंदांस्युक्तानिमुनिभिर्गायत्र्युष्णिगनुष्टुभः ४ देव्यः प्रोक्तामहापूर्वाः कालीलक्ष्मीसरस्वतीनं
दाशाकंभरीभीमाः शक्तयोस्यमनोस्मृताः ५ स्याद्रक्तदंतिकादुर्गाभ्रामर्योबीजसंचयः अग्निवायुभगास्त
त्वंफलंवेदत्रयोद्भवं ६ भगःसूर्यः सर्वाभीष्टस्यसिद्ध्यर्थंविनियोगउदाहृतः अथषडंगदेवतानिशि

रोमुखहृदिन्यसेत् ७ शक्तिबीजानि स्तनयोस्तत्त्वानि हृदयेपुनः मंत्रेशो गां पल्लवोवासो मंत्राणां प्रवरः शिरः ८
शिरः पल्लवसंयुक्तो मंत्रः कामदुघोभवेत् पल्लवाश्च नमोंतः शांतिके पुष्टौप्रणिपाते च कीर्तितः ९ वश्याकर्षणयोर्होमे
स्वाहांतः सिद्धिदायकः वौषट्पल्लवसंयुक्तो मंत्रः पुत्रादिसाधकः १० हुंकारपल्लवोपेतो मारणोच्चाटनं विना यंत्रभंजन
कार्येषु सुघोरभयनाशने ११ वषडंतः प्रकल्प्यस्तु ग्रहबाधाविनाशकः उच्चाटनेतु संप्रोक्तो मंत्रः फट्पल्लवान्वितः १२ ए
ते पल्लवास्तस्तत्कार्ये तु शिरा चंडीपाठेपि श्लोकांतादौ योज्याः तथा न्यासहीनो भवेन्मूको मृतः स्यात् छिरसा विना १३ अपल्लव
स्तु नग्नः स्यात् सुप्तः स्यादासनं विना गुरुं विना वृथा मंत्रः अमज्जापस्तु शून्यकः १४ निर्बीजो दुष्टदंतः स्यात्स्यान्मवीजस्तु कीलितः
स्तु नग्नः स्यात् सुप्तः स्यादासनं विना गुरुं विना वृथा मंत्रः श्रमज्ञापस्तु शून्यकः
दुष्टदंतः दुष्टयदन्त ऊर्ध्वः देवर्षि दर्षिहीनोयः सतुप्रोक्तो भुजंगमः १५ मूकादयो मंत्रावर्ज्याः वैदिके मंत्रे न पल्लवादिविचा
रः क्लींचण्डिकायै इत्यनेनास्य स्तोत्रस्य षडंगकरन्यासो हृदयायनमः शिरसे स्वाहा शिखायै वषट् कवचायहुं नेत्रत्रया
य वौषट् अस्त्राय फट् इति क्रमः अत्रसर्व[illegible]दिषु बोध्यं नवबीजमंत्रांते चंडिकात्वमतामिति मंत्रेणातर्पणं [illegible]होमादिश्च
अथ यंत्रे लिखेदष्टदलं पद्मं कुंकुमागरुचंदनैः पद्ममध्ये लिखेच्चक्रं षट्कोणं चंडिकामयं षट्कोणचक्रमध्यस्य मा
ध्ये हृं बीजत्रयं न्यसेत् तत्रमध्यबीजे महालक्ष्मीः तद्दक्षिणे महाकाली वामे सरस्वती पूर्वादिषट्सु कोणेषु बीजान्यस्मान्निन्यसे

त् इदं दुर्गायंत्रं पद्मासनाद्यन्यतमासनं तथासती श्लोकैर्न्यासः खड्गिनी शूलिनीत्यादि पठित्वा श्लोकपंचकं आद्यं दुर्ग्गेति
त् इदं दुर्गायंत्रं पद्मासनाद्यन्यतमासनं तथासतीश्लोकैर्न्यासः खड्गिनीशूलिनीत्यादि पठित्वा श्लोकपंचकं आद्यं हृन्म
तरं बीजं ध्यात्वा सर्वांगके न्यसेत् आद्यं दुर्गेभिति शूलेन पाहि नो देवीत्यादि श्लोकचतुष्टयं पठित्वा स्तुष्यसदृशं द्वितीयं सर्वे तो
न्यसेत् द्वितीयं ह्रीमिति सर्वस्वरूपे इत्यादि श्लोकांतं पंचकं पुनः पठित्वा स्फटिकाभासं तृतीयं स्वनेत्रे न्यसेत् तृतीयं क्लींमिति



दुर्गेदेवि श्लोके राष्ट्रहृदयेन षडंगन्यासोपिकचिदुक्तः ततः षडंगं कुर्वीत विभक्तैर्मूलवर्णकैः
एकैकेनैकेन चैकेन चतुर्भिर्युगलेन च समस्तेन च मंत्रेण कुर्यादंगानि षट् सुधीः एवं न्यासवि
धिं कृत्वा स्वष्टिमुद्रां विलोकयेत् ततः परिषिंचति पूजार्थं द्रव्याणि नव [illegible] बीजतः तत्पश्चा
द्धेनुमुद्रां दत्वा स्वेनावगुंठयेत् अर्घ्यपात्रं प्रतिष्ठाप्य पूरयेत् कुंभवारिणा गंधपुष्पाक्षता
स्तत्र विन्यस्य न्यपनेदन ध्यात्वा सर्वाणि तीर्थानि हस्तो दत्वाभिमंत्रयेत् रक्षार्थं तस्य कर्त
व्या चक्रमुद्रा च संयुता अर्घोदकेन संस्कारं पूजाद्रव्यस्य पूर्ववत् अथ महाकाल्यादि देव
वतात्र यथानं खड्गं चक्रगदे षुचापपरिघा न् शूलं भुशुंडी शिरः शंखं संदधती करैः त्रि
नयनां सर्वांगभूषावृतां नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां यामस्तौ स्व
पिते हरौ कमलजो हंतुं मधुं कैटभम् अक्षस्रक्परशुं गदे षु कुलिशं पद्मं धनुः कुंडि

राम
१२

स्तासांपूजा तत्रहीनाधिकांगीकुष्ठव्रणयुतांध्यांकाणां कुरूपांवेकरांरोमयुक्देहांदासीजांरोगिणींदुष्टामेव
मात्रायज्यां: विप्रांसर्वेष्टसंसिद्ध्यैयशसेक्षत्रियोद्भवां वैश्यजांधनलाभायपुत्राप्त्यैशूद्रजांयजेत् इति गंधपुष्प
धूपदीपभक्ष्यभोज्यैर्यथाशक्तिवस्त्राभरणैश्चपूज्याः वेद्यांविरचितेरम्येसर्वतोभद्रमंडले घटंसंस्थाप्यविधिवत्तत्रा
वाह्यार्चयेच्छिवां तदग्रेकन्यकांश्चापिपूजयेद्ब्राह्मणानपि उपचारैस्तुविविधैर्नैवार्णावरणान्यपि तत्र ॐकारः
प्रथमंपीठंपूर्णपीठमतःपरं तृतीयंकामपीठंचपूजयेत्संप्रदायतः पूर्वादिदिक्षुपीठस्यगणेशादिचतुष्टयं गणेश
क्षेत्रपालौचपादुकेवटुकास्त्वयः आग्नेयादिचतुर्दिक्षुपूज्यंदेवीचतुष्टयं जयाचविजयाचैवजयंतीचापराजिता पू
र्वाक्रयंत्रपूर्वकोणेसरस्वतीसहितोब्रह्मा श्रीसहितोविष्णुः नैऋत्येउमयाशिवोवायव्ये षट्कोणेचक्रमध्यस्य म-
ध्यबीजेमहालक्ष्मीःमहाकालीमहासरस्वतीचतद्दक्षिणवामयोः उदक्सिंहोदक्षिणेमहिषः षट्कोणेषुनंद
जा १ रक्तदंतिका २ शाकंभरी ३ दुर्गा ४ भीमा ५ भ्रामर्य्यः ६ सर्विंदुनामाद्यर्णाद्यास्ताराद्याश्चासांनाममंत्राःपूजादौ
तारःप्रणवः अष्टपत्रेषुब्रह्माणीमाहेश्वरीकौमारीवैष्णवीवाराहीनारसिंहीऐंद्रीचामुंडा उक्तरीत्यानाममंत्रैःपू
ज्याः ततोविष्णुमायादिचतुर्विंशतिदेवताः प्रागादिक्रमेणकेसरेषुपूज्याः प्रतिपत्रंचकेशरत्रयंताश्चविष्णुमाया

पक्षे आरभ्याग्नितिथिं पुनः अष्टम्यंतं जपेल्लक्षं दशांशं होममाचरेत् इति अथ शतचंडीविधिः शंकर संभवा मावा
र्त्तादिनिकटे शुभं मंडपं चारवेद्याढ्यं कुर्यात्सध्वजतोरणं तत्र कुंडं च कुर्वीत प्रतीच्यां मध्यतोपि वा स्नात्वा नित्यक्रियां
कृत्वा वृणुयाद्दश वाडवान् जितेंद्रियान्सदाचारान्कुलीनान्सत्यवादिनः वाडवाः ब्राह्मणाः कुमनस्काश्चंडीपाठरतान्
लज्जाद्ययावतः मधुपर्कविधानेन वस्त्राणि वस्त्रादिदानतः जपार्थमासनं मालां दद्यात्तेभ्योपि भोजनं तेह विप्रा नम्रम
तो मंत्रार्थगतमानसाः भूमौ शयानाः प्रत्येकं जपेयुश्चंडिकास्तवं मार्कंडेयपुराणोक्तं दशावृत्त्वा सचेतसः नवार्णं चंडि
कामंत्रं जपेयुश्चायुतं पृथक् पृथक् संपुटीकरणादि तिशेषः प्रत्येकं ब्राह्मणैरयुतमयुतं जपः कार्यः यत्तु पंचभिः स
प्तभिर्वापि नवैकादशभिस्तथा अदीर्घदिवसैः क्षिप्रं विदध्याच्चंडिकामखं अयुग्मदिवसैः कार्यं शतचंडी सिद्धये
त्रिपंचसप्तनवभिर्दिनैः पक्षेण वा पुनः देवीमाहात्म्यपाठं तु युग्मैर्दिवसैः कृतं तु यत् निःफलं च भवेत्सर्वं भूतिनाशं च
प्राप्नुयादिति वचनत्रयं क्वोक्तं तत्र नाम्ना प्राप्यते तत्तु निर्मूलं अष्टमी नवमी चतुर्दशी पौर्णमासी सु यथाशक्ति भवं
ति तथा आरंभः कर्तव्य इति सा प्रदायिका: यजमानः पूजयेद्बकन्या नो नवकं शुभं द्विवर्षाद्या दशाब्दांताः कुमारीः परि
पूजयेत् एकाब्दायाः प्रीत्यभावो रुद्राद्यानु विवर्जिता तासां क्रमेण नामानि कुमारि १।२ त्रिमूर्ति २।३ कल्याणी
३।४ रोहिणी ४।५ कालिका ५।६ चंडिका ६।७ शांभवी ७।८ दुर्गा ८।९ सुभद्रा ९।१० एतैरेव नाममंत्रै

राम
१३

स्तासां पूजा तत्र हीनाधिकांगी कुष्ठव्रणपुताश्चांधाकाणाः कुरूपाः वैकराले मयुक्तदेहा दासीजा रोगिणस्त्वेव
मायायज्ञाः विप्रां सर्वकर्मसिद्ध्यै यशसे क्षत्रियोद्भवां वैश्यजां धनलाभाय पुत्राप्त्यै शूद्रजां यजेत् इति गंधपुष्प
धूपदीपभक्ष्यभोज्यैर्यथाशक्ति वस्त्राभरणैश्च पूज्याः वेद्यां विरचिते रम्ये सर्वतोभद्रमंडले घटं संस्थाप्य विधिवत्तत्रा
वाह्यार्चयेच्छिवां तदग्रे कन्यकाश्चापि पूजयेद्ब्राह्मणानपि उपचारैस्तु विविधैर्नवार्णावरणान्यपि तत्र ॐकारः
प्रथमं पीठं पूर्णपीठमतः परं तृतीयं कामपीठं च पूजयेत्संप्रदायतः पूर्वादिदिक्षु पीठस्य गणेशादिचतुष्टयं गणेश
क्षेत्रपालौ च पादुके वटुकास्त्रयः आग्नेयादिचतुर्दिक्षु पूज्यं देवीचतुष्टयं जया च विजया चैव जयंती चापराजिता पू
र्वोक्तयंत्रे पूर्वकोणे सरस्वतीसहितो ब्रह्मा श्रीसहितो विष्णुः नैऋत्ये उमया शिवो वायव्ये षट्कोणचक्रमध्यस्य म-
ध्यवीजे महालक्ष्मीः महाकाली महासरस्वती च तद्दक्षिणवामयोः उदक्सिंहो दक्षिणे महिषः षट्कोणेषु नंद
जा १ रक्तदंतिका २ शाकंभरी ३ दुर्गा ४ भीमा ५ भ्रामर्यः ६ सविंदुनामाद्यर्णाद्यास्ताराद्याश्चासां नाममंत्राः पूजादौ
तारः प्रणवः अष्टपत्रेषु ब्रह्माणी माहेश्वरी कौमारी वैष्णवी वाराही नारसिंही ऐंद्री चामुंडा उक्तरीत्या नाममंत्रैः पू
ज्याः ततो विष्णुमायादिचतुर्विंशतिदेवताः प्रागादिक्रमेण केसरेषु पूज्याः प्रतिपत्रं च केशरत्रयं ताश्च विष्णुमाया

15

चेतना २ बुद्धि ३ निद्रा ४ क्षुधा ५ छाया ६ शक्ति ७ तृष्णा ८ क्षांति ९ जाति १० लज्जा ११ शांति १२ श्रद्धा १३ कांति १४
लक्ष्मी १५ वृत्ति १६ स्मृति १७ दया १८ तुष्टि १९ पुष्टि २० मातृ २१ भ्रांति २२ व्याप्ति २३ चिति २४ रूपाः एतावतास
प्तशतीस्तव पंचमेध्याये आसां चतुर्विंशतीनां पाठ इति नभ्रमितकं कात्यायनीतंत्रविरोधात् नालमूलेतु संपूज्यमाधा
रादिचतुष्टयं आधारकूर्मशेषोवराहश्च चतुर्थीपृथिवीनप गरुकोणेषु· गणेशक्षेत्रपालौवटुकोयोगिन्यः इंद्राद्याश्चे
ति एवंचतुर्दिनंकृत्वापंचमेहोमंसमाचरेत् तत्रप्रथमेह्नि एकाहुतिः द्वितीयेद्वे तृतीयेतिस्रः चतुर्थेचतस्रः प्रतिश्लो
कंहोमद्रव्याणि पायसान्नैस्त्रिमधक्तैर्द्राक्षारंभाफलादिभिः मातुलिंगैरिक्षुखंडैर्नारिकेलैःपुरैस्तिलैः जाती
फलैराम्रैःफलैरन्यैर्मधुरवस्तुभिरिति स प्रशास्तादशाहात्मा प्रतिमंत्रंहुतंचरेत् अयुतंचनवार्णेनस्थापितेग्नौवि
धानतः कृत्वावरणंदेवानांहोमंतन्नाममंत्रतः कृत्वापूर्णाहुतिंसम्यक्देवमग्निंविसृज्यच अभिषिंचेद्य
यष्टारंविशेषःकलशोदकैः निष्कंसुवर्णमथवाप्रसेकंदक्षिणांदिशेत् भोजयेच्चशतंविप्रान्भक्ष्यभोज्यैःपृ
थक्पृथक्विधैः तेभ्योपिदक्षिणांदत्वागृह्णीयादाशिषस्ततः एवंकृतेजगद्वश्यंसर्वेनश्यंत्युपद्रवाइति एतद्दश
गुणंकुर्याच्चंडीसहस्रकेविधिं विधावतःसदाचारान्द्विजान्स्तृणान्नहृष्णुयाच्छ्रुतं प्रत्येकंचंडिकापाठान्विद

राम
१५

घ्नुस्तो दिशोभितान् चतुर्भिर्दिनैस्तु कारीस्येतिशेषः अयुतं प्रजपेद्युक्त्या प्रत्येकं नववर्णकं पूर्वोक्ताः क्रमकाः स्फुरा
पूर्वे मंत्रैः शतं शुभाः वेदाष्टमेवं संपाद्य होमं कुर्युः स्युः अयान्ततः सप्तशत्याशतावृत्त्या प्रतिमंत्रं विधानतः लक्षसंख्य
नवार्णेन पूर्वोक्तैर्द्रव्यसंचयैः होतव्यो दक्षिणां दत्वा पूर्वोक्तान् भोजयेद्द्विजान् सहस्रसंमितान् साधून्देव्याराधनत
त्परान् एवं सहस्रसंख्याके कृते चंडीविधानेयां सिद्धं त्वभीप्सितं सर्वं दुःखौघश्च विनश्यति मारीदुर्भिक्षरोगाद्यान
श्यंतितत्सनोत्रयाः एतद्दशगुणो विधिरयुतचंड्यां तद्दशगुणो विधिर्लक्षचंड्यां शतचंड्यां सरोरेवया चत्वारिंशाद्दि
नैरयुतचंडीकार्या: तत्र प्रथमे दशके एकैकावृत्तिः द्वितीयदशके द्वे तृतीये तिस्रः चतुर्थे चतस्रः इत्यादि वोध्यमिति
मंत्रमहोदधौ नवार्णसंपुटितचंडीपाठविधिः रुद्रयामले प्रथमं चरितं प्रोक्तं मधुकैटभनाशनं द्वितीयं विद्धि चरि
तं महिषासुरघातनं उत्तरं चरितं ज्ञेयं शुंभदैत्यवधान्वितं चरितानि जपेद्धीमान् सरहस्यान्यतंद्रितः रहस्यमंत्रा
न्यध्यायद्वयं त्रयं वा चरितं मध्यमं वापि जपेद्वा चंडिकामयं नमो देव्या इमं मंत्रं जपेद्वा कालिकाप्रियमिति इत्यादि
वोध्यमिति मंत्रमहोदधौ नवार्णसंपुटितचंडीपाठविधिः मार्कंडेयपुराणखिलत्वेन प्रसिद्धे नित्यचंडी आदि जाप्य
सविधानं तेवदाम्यहं शुद्धात्मभूतामवद्धम्य मासं प्रतिदिनं जपेत् सहस्र द्रहस्यसंयुक्तं चंडिकाचरितत्रयमित्यत्रा

स्य स्तोत्रस्य भुक्तिमुक्तिप्रदत्वप्रतिपादकमंत्रमध्यायद्वयं तदर्थस्य देवीमात्रवेद्यत्वाद्रहस्यत्वं एकादशस्यांत्य
भागोपि देवीवेद्यत्वाद्रहस्यमिति तद्दृष्टित्वात्सोपि रहस्यमित्येतद्दशांशहोमसहितं स्तोत्रं नित्यं चंडिका धन
पुत्रयशोदात्री महाव्याधिविनाशिनीति हि कश्चित्पठते अथ कवचमहादेवो दुर्गाहोमपरायणाः कवचाहुतिमा
त्रेण महेशेन निपातितनुरिति तत्र कवचं मूलेन षाड्भिर्नो देवीत्यादिश्लोकचतुष्टयं तदाहुतिचतुष्टयं महालक्ष्म्यै
स्वाहेत्येवेत्यभियुक्ताः यत्तु चंडीपाठे न होतमं कृत्वानु कवचं पुरा ततश्चाप्यर्गलां चैव ततो वै कीलकं भवेत् ततः
सप्तशतीं चैव रहस्यं पश्चात्तथा चंडीपाठे तथा होमे क्रमस्तो मनीषिभिः प्रतिश्लोकं च जुहुयादिति रुद्रयामल
नाम्नोक्तं तत्र मूलं मृग्यं बहुसंमतत्वात् तत्रानुपलंभाच्च पुनः खिलग्रंथे शुक्लषष्ठीं समारभ्य यावच्छुक्लेचतु
र्दशी नवदुर्गाविधानं स्यात्सर्वकामफलप्रदम् संपूज्य विधिवद्देवीं चंडिकां हृततत्पराः कलशं पंचरत्नाढ्यं सह
कारदलैर्युतं सर्वतः संप्रतिष्ठाप्य चंडिकायै प्रसाध्य ते समंतात्पूजयेद्दिक्षु दिक्पालान्यथाक्रमं चंदनेन विलि
प्तांगाः स्रग्वी न्यासपरायणाः नवाहं रूपमेकैकं मौनी वह्निमनी जपेत् प्रणवादिसरहस्यं चंडिकाचरितत्रयं ह
स्मोषष्ठीं समारभ्य नवदुर्गाविधानवित् यद्ययं क्रियते जापः कालरात्रिर्मदाहृता महाकालोद्भवं दुःखं का

राम
१५

लैरात्रिर्मपोहति अथहोमविधिः चतुरस्रोऽस्यमेकुंडेसमंताद्धस्तमात्रके एकावरणसंयुक्तेयोनिमंडलमंडिते दशांश
विधिनाहोममुत्तमेनसाधयेत् नित्यंचैष्टानवचंड्यांकुंडमेवंविधंस्मृतं एतद्द्विगुणितंकुंडंशतचंड्यांप्रकीर्तितं शार
दायां कुंडानिचागमोक्तानिविदध्याद्विधिवद्गुरुः सर्वतंत्रानुसारेणकर्तव्यंतंत्रवित्तमैरिति तेनकुंडानांतांत्रिकत्वमु
क्तं पुराणोक्तमपितांत्रिकाण्येवतान्युक्तानि तस्मात्तत्तु मुष्टिमात्रंशताद्धस्ताच्छतेवैरत्निमात्रकं सहस्रकेहस्तमात्रमयुते
सार्द्धहस्तकं लक्षार्द्धेत्रिकरंकुंडंलक्षहोमेचतुःकरं कोटिपंचकरंदंडंदशलक्षाहुतिष्वपि षट्करंलक्षविंशत्यांकोट्य
र्द्धेसप्तहस्तकं कोटिहोमेदशकरंकुंडंप्रोक्तंमहर्षिभिः दशहस्तान्नहिपरंकुंडमस्तिमहीतलेइति इदमेवस्थंडिलमानं
खाताधिकेभवेन्मृत्युरोगीहीनेधनक्षयः वक्रकुंडेतुसंतापोमरणंछिन्नमेखले मेखलारहितेशोकोप्यधिकेवित्त
संक्षयः भार्याविनाशनंकुंडंप्रोक्तंयोन्याविवर्जितं अनेकदोषदंकुंडंदिक्स्रष्टेकुलनाशकृत् कुंडमेवंविधंकथंस्थं
डिलंतुसमाचरेदिति तत्रतांत्रिकाणांकुंडस्यप्रकृतित्वात्तद्धर्माणामेवमेखलायोन्यादीनांस्थंडिलेप्राप्तिः वैदिकानांतुयो
निमेखलादिरहितंस्थंडिलमेवेत्यन्यत्रविस्तरः संस्कारैरष्टभिःकुंडंसंस्कृत्याग्निंनिधापयेत् कुंडमध्यंभुवंदर्भैःपरि
मार्ज्यप्रलेपयेत् प्रागग्राः स्रुवमूलेनलेखास्तिस्रः समुल्लिखेत् पांसूनुद्धृत्यरेखाणामभ्युक्षणमतःपरं कुंडस्य

पूजनं षष्ठः सप्तमः समसुद्रया ॥ अन्वावगुण्ठनं कुंडे संस्कारश्चाष्टमः स्मृतः अथ मंगलनामानं कुंडे
ग्निं समिध्यापयेत् अत्र सर्वत्र मायाबीजं मंत्रः वेदिकापाठसंपूर्णेन ब्रह्माणं दक्षिणे दिशि ततस्तदग्नि
मत्कुंडं नवसूत्रेण वेष्टयेत् कुंडस्योत्तरतः स्थाप्या प्रणीता वारिपूरिता प्रणीतावारितः पूर्वे स्थाप्यः पात्रग
णः क्रमात् आज्यस्थाली गव्यक्षीरमन्विता स्रुक्स्रुवौ घृतं गव्यं सुसंस्कृतं तत्र तंडुलाः कुशपूलकः पाला
श्यः समिधास्तिस्रः पूर्णपात्रमतः परं सप्तद्वीपेश्वरीं ध्यात्वा गृहीत्वा कुशमूलकं निःक्षिपेत्प्रणीतापात्रे वारु
णं बीजमुच्चरन् तेन दर्भसमूहेन शतसंख्येन चेश्वरि क्रमात्पात्राणि संप्रोक्ष्य प्रोक्षणीपात्रवारिणा आज्यं
पात्रे चरुस्थाल्यां निक्षिपेत् घृतं तंडुलान् यथाक्रमेण कर्तव्यं ततोधिश्रयणं तयोः आदौ वैपाय संकार्यं पर्य
ग्निकरणं तयोः सव्ये पालाशकाष्ठेन त्रिस्त्रिर्दर्भैश्च सोज्वलं स्रुवयोः स्थापनं कृत्वा दक्षिणे स्थापनं स्मृतं उद्वास
प्रथमं पूर्वी दानीयाग्नेः प्रदक्षिणं कुंडाचार्यांतरे स्थाप्य स्वबीजं जपमादरात् स्वबीजमसृतबीजं अविधार्य
स्वबीजेन वायव्ये स्थापयेच्चरुं तिष्ठन्पलाशसमिधो मौनी वैश्वानरे जपेत् कुशपूलकयुग्माभिः प्रोक्षणपद्भिः

प्रदक्षिणं पर्युक्षाग्निं प्रणीतायां निःक्षिपेत्कुशपूलकं निधायदक्षिणंजानुभूमावग्निमुखंकुर्वीत् अन्वार
ब्धस्रुवेणाज्यं निर्धूमे हव्यवाहने प्रजापतिर्महाकालीमहालक्ष्मीसरस्वती एतदग्निमुखंप्रोक्तं मायाबीजपुरःसरं
संस्रवान्प्रोक्षणीपात्रे निःक्षिपेद्यज्ञसाधनात् विदध्यात्कल्पितं होममुक्तेन हविषा समी कल्पितं संकल्पितमिम
र्थः ततः स्विष्टकृतं दद्याद्धविषा सोज्ज्वलेनले मायाबीजंब्रह्माणीमाहेश्वरीकौमारीवैष्णवीनारसिंहीऐंद्रीचामुं
डायेविच्चे विष्णुतेस्वाहा एषप्रोक्तो महादेविमंत्रः स्विष्टकृदाहुतौ आज्येनन वाहुतिकं मायाबीजादिनामभिः नंदा १
रक्तदंतिका २ शाकंभरी ३ दुर्गा ४ भीमा ५ भ्रामरी ६ कालिका ७ शिवदूती ८ प्रजापतिभ्यः ९ गंधपुष्पफलोपेतां
हुत्वा यज्ञात्मिकां ध्रुवं ततः पूर्णाहुतिं दद्याद्धृतेनाछिन्नधारया नवाक्षरेण मंत्रेण महालक्ष्मीपरायणः ध्या
त्वा यज्ञपुरोडाशममृतं देवदुर्लभं प्रोक्षणीपात्रमध्यस्थान्मंत्रेणाज्यातिसंस्रवान् यस्माद्यज्ञरसात्सूताय ज्वानोव्र
ह्मरूपिणः तेसंस्रवपुरोडाशं प्राश्नाभिमुखपुत्रायदभिति मंत्रः सलिलेन प्रणीतायास्तीर्थध्यानपरायणः करो
तिमार्जनं दर्भमात्रेन श्लोकपाठतः याभिः शिवा शक्रमुख्या याभिश्च सविता सह याश्चयाः सन्निधानस्थास्ते मेहूरां वंतु
मेयजं सिसृक्षोर्निखिलं विश्वं मुमुक्षुः शक्रं प्रजापतेः मातरः सर्वभूतानामापो देव्यः पुनंतु मां अलक्ष्मीमलरू

पांयाः सर्वभूतेषु संस्थिता व्यालयंति कुलस्पर्शा द्यापो देव्याः पुनंतु मामिति मंत्रः अभिषिंचेद्यथात्मानं चतुर्भिश्चंडि
कास्तवैः शूलेन पाहि नो देवीत्यादि चतुष्टयं प्रणितोदकमार्जने ऋत्विक्कर्तृकयजमानाभिषेके तु विश्वेश्वरीं
जगद्धात्रीं १ देव्याययाततमिदं २ नमो देव्यै महादेव्यै ३ देविप्रपन्नार्तिहरे प्रसीदेति ४ श्लोकचतुष्टयं दानं दद्या
विधानेन हेमधेनुं वरादिकं अथ होमः कात्यायनीतंत्रोक्तमंत्रविभागेन नवाक्षरेण वा नमो देव्या इतिश्लोकेन वा
जयंती मंत्रेण वा सर्वमंगलमंगल्येति मंत्रेण वा कुर्ने जपदशांशेन पायसं तिलसर्पिषा नवाक्षरेण मंत्रेणास्मा ती
श्रोन्नपनंदन नमो देव्या इति मंत्रेण जुहुयाद्वा शुभं हविः जुहुयात्स्तोत्रमंत्रैर्वा चंडिकायै शुभं हविरित्युक्तेः अत्रस्मा
तीर्थ्याविस्तुते ब्राह्मणस्य होमः स्मार्तोग्नावेव उक्तत्रिकप्रकारस्तु तदितरस्यैव तत्रश्रद्धस्तो त्रिकस्य तदितराणां
र्भकाय होमासंभवे द्विगुणो जपः पायसाभावे तु समित्सर्पिस्तिलानां हवनं भवेदिति स जपं होममावेद्य महालक्ष्मीं
धराय्यञ्च शूलेन पाहि नो देवीत्येतैः श्लोकैः प्रदक्षिणं विदध्यात्तु स्थिरो भूत्वा चंडिकाध्यानतत्परः इत्येतैः शूलेने
त्यादिभिरस्मान्रक्ष सर्वत इत्येतैरित्यर्थः नमो देव्या इति श्लोकैः पंचभिर्ध्यानतत्परः कृत्वा पंच नमस्कारानुपावि
श्य आसने शुभे सर्वस्वरूपे इत्यादि षड्भिः श्लोकैः कृतांजलिः प्रार्थयेज्जगतां धात्रीं प्रणतात्मा हृदीप्सितं स्वशरीरे
समारोप्य दद्यादस्यै विसर्जनमिति अनेन विधिना यस्तु प्रकुर्याच्चंडिकार्चनं तस्य तुष्टा महालक्ष्मीः सर्वान्का

मान्तां प्रयच्छति ॥ अथ पारणं कृता विधे मासि शुक्लपक्षे नृपोत्तम प्रतिपत्तिथिमारभ्य नवचंडीं समारभेत् कलशं पंचर
त्नाढ्यं हेमवस्त्रोदकान्वितं संप्रतिष्ठाप्य संपूज्य चंडिकार्चनमारभेत् तत्र पूर्वादिक्रमयोगेन दिग्देवीभ्यो बलिं हरेत् गंध
पुष्पाक्षतैर्धूपैर्दीपैश्च रूपिभिस्तथा इमैः दिग्देवस्य कादंबरी गजारूढा पुनरुत्का च पूर्वगा करालीमहिषारूढा रक्ताक्षी प्रेतसं
स्थिता श्वेतकुंभीरगाग्रेऽरूढा हरितामृगवाहना यक्षिणी सिंहपृष्ठस्था केकाली वृषवाहना हंसपृष्ठे सुरज्येष्ठा सर्पराज्ञाधि
वाहना एतश्च पुष्टिंगादि दिग्देवा मूर्तिकल्पितं नवग्रहांस्तथा लोकपालान्दिशापालांश्च पूजयेत् पंचोपचारैः कुमारीं वि
प्रमुख्यांश्च भोजयेद्विधिपूर्वकं यदाद्ये दिवसे कुर्याच्चंडिकापूजनादिकं एकाहारव्रती कुर्यात्सप्तादिनियमैर्युतः हु
त्वा होमादिकं सर्वं नवदुर्गाविधानवित् विप्रश्रांतं परिसमाप्य कुर्यादाचार्यतो वराम् इति शतचंडीविधये दक्षिणायां वि
शेषतरुक्तस्तत्र यस्याः प्रभावमतुलं श्लोकमुक्त्वा कृतांजलिः दद्यात्कौमिथुनान्येषां चार्याय ससुभक्तिमान् चतुर्विंशतिसंख्या
केर्हेमगोधानकैः सह ब्राह्मणो निष्कषट्काख्यं दद्यात्कौमिथुनद्वयं यद्वा एकैकं दश वा विप्रेभ्यो दद्यात्कौमिथुनं समं निष्कत्र
यसमायुक्तं वस्त्रालंकारभूषितमिति १ यद्यत्कार्यं समुद्दिश्य भक्तिपतेश तत्तच्चंडिका ततस्तस्य महालक्ष्मीः सप्तमातृश्च प्रयच्छति
रुद्रविद्रुद्रयामले इत्युक्त्वा द्वांतराणि पिहोमे उक्तानि तत्र प्रधानहोमः स्यात्त्रिमधुप्लुततत्त्वमः प्रधानद्रव्यमुद्दिश्य पायसा

न्नंतिलास्तथा यवैर्वा श्रीफलैर्वापि नानाविधफलैस्तथा किंशुकैः सर्षपैः पूगैस्तंडुलैर्दूर्वांकुरैस्तथा करवीरैः रक्तपुष्पैरशो
कलसितैरपि रक्तचंदनखंडैश्च गुग्गुलैश्च मनोहरैरिति अथ ब्रह्मांडपुराणान्तर्गतस्याध्यायश्लोकसंख्या केचिदुक्ता तत्राद्य
चरिताध्यायश्लोके काशीतिरुक्तमा ८१ अथ मध्यचरित्रे तु अष्टषष्ठ्ये श्लोक १५८ शुसंख्यकाः त्रयोध्यायाश्चतुः सप्त ७४ चतुर्वेद ४४
खवेदकाः ४० अथोत्तमचरित्रे तु बट्षडग्नि ३६६ श्लोकभागिनेति अग्निसोमा १३ ध्यायवती गीता सप्तशती स्मृता त
थाकवचार्गलकीलकानामपि श्लोकसंख्योक्ता श्रीकवचकवचस्य त्रिपंचाशत् ५३ श्लोकमालिता अर्गलाकीलके त्र
या विंशति २८ विंशतिः २० अथोरहस्यत्रयस्य मनुकु ११४ वा युतिच तनुकान्यायनीतं ओक्तमंत्रविभागेन विरोधान्नि
र्मूल्लमिति ध्येयं अत्र निष्कदक्षिणा यां दरिद्राणां चतुः सुवर्णमितं रजतरूप्यं निष्करूपं दक्षिणा समर्थानां च तु सुवर्ण
मितं हेम सुवर्णमशीतिगुंजामितं ॥ इति श्रीमदुपाध्यायोपनामकश्रीवभट्टसुतसतीगर्भजनागोजीभट्टकृते
मार्कंडेयपुराणांतर्गतसप्तशत्याख्यस्तोत्रमाख्यानेचंडीस्तोत्रविधिः समाप्तः संवत् १८६६ मार्गशुक्लप्रतिपदायां श्री
वरसहरे प्रेमवल्लभेन लिखितं कामदेवसुतार्थं चंद्रशेखरलक्ष्मीधरयोर्वा ॥ अध्यायेषु श्लोकसंख्या ॥—॥—॥
१८ । ६९ । ४४ । ४२ । १५ । २० । २५ । ६१ । ४८ । ३७ । ५० । ३८ । १७ शुभमस्तु लेखकपाठकयोः